# સદાશિવ પઞ્ચરત્નમ

## Sadashiva Pancharatnam

---

સદાશિવપઞ્ચરત્નમ ।

યત્સન્દર્શનમાત્રાદ્ભક્તિર્જાતાપ્યવિદ્ધકર્ણસ્ય ।
તત્સન્દર્શનમધુના કૃત્વા નૂનં કૃતાર્થોઽસ્મિ ।।૧।।

યોઽનિશમાત્મન્યેવ હ્યાત્માનં સન્દધદ્વીથ્યામ ।
ભસ્મચ્છન્નાનલ ઇવ જડાકૃતિશ્ચરતિ તં  નૌમિ ।।૨।।

યસ્ય વિલોકનમાત્રાચ્ચેતસિ સઞ્જાયતે શીઘ્રમ ।
વૈરાગ્યમચલમખિલેષ્વપિ વિષયેષુ પ્રણૌમિ તં યમિનમ ।।૩।।

પુરતો ભવતુ કૃપાબ્ધિઃ પુરવૈરિનિવિષ્ટમાનસઃ સોઽયમ ।
પરમશિવેન્દ્રકરામ્બુજસઞ્જાતો યઃ સદાશિવેન્દ્રો મે ।।૪।।

ઉન્મત્તવત્સઞ્ચરતીહ શિષ્યસ્તવેતિ લોકસ્ય વચાંસિ શ્રૃણ્વન ।
ખિદ્યન્નુવાચાસ્ય ગુરુઃ પુરાહો હ્યુન્મત્તતા મે ન હિ તાદૃશીતિ ।।૫।।

પઞ્ચકમેતદ્ભક્ત્યા શ્લોકાનાં વિરચિતં લોકે ।
યઃ પઠતિ સોઽપિ લભતે કરુણાં શીઘ્રં સદાશિવેન્દ્રસ્ય ।।૬।।

ઇતિ સદાશિવપઞ્ચરત્નમ સંપૂર્ણમ ।।

**www.shaivam.org**

---